तृष्यमाणः, तर्ष्यमाणः, तितर्षिष्यमाणः, तरीतृष्यमाणः ;
तर्षः, तर्षः, तितर्षिषः, तरीतृषः ;
तर्षितुम्, तर्षयितुम्, तितर्षिषितुम्, तरीतृषितुम् ;
[1]तृष्टिः, [2]तृट्, तर्षणा, तितर्षिषा, तरीतृषा ;
तर्षणम्, तर्षणम्, तितर्षिषणम्, तरीतृषणम् ;
[3]तर्षित्वा-तृषित्वा, तर्षयित्वा, तितर्षिषित्वा, तरीतृषित्वा ;
प्रतृष्य, प्रतर्ष्य, प्रतितर्षिष्य, प्रतरीतृष्य;
[4]द्व्यहतर्षं द्व्यहं तर्षं द्व्यहेन तर्षं वा गाः पाययति ।
तर्षम् २, तर्षित्वा २-तृषित्वा २, } तर्षम् २, तर्षयित्वा २, } तितर्षिषम् २, तितर्षिषित्वा २, } तरीतृषम् २; तरीतृषित्वा २; }
[5]तृष्णा.

(776) "तृह हिंसायाम्" (VII-रुधादिः-1455. अक. सेट्. पर.) [अ]

'श्वे तृणेढीति हिंसायां तृहतीत्यूदितस्तृहेः ॥' (श्लो-195) इति देवः ।

तर्हकः-र्हिका, तर्हकः-र्हिका, तितर्हिषकः-षिका, तरीतृहकः-हिका ;
तर्हिता-त्री, तर्हयिता-त्री, तितर्हिषिता-त्री, तरीतृहिता-त्री ;
[6]तृंहन्-न्ती, [7]व्यतितृंहन्-न्ती, तर्हयन्-न्ती, तितर्हिषन्-न्ती ;

---

1. 'तितुत्र—' (7-2-9) इतीण्णिषेधे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वे च रूपम्
2. स्त्रियाम्, 'सम्पदादिभ्यः—' (वा. 3-3-94) इति भावे क्विपि रूपम् ।
3. 'तृषिमृषिकृशेः काश्यपस्य' (1-2-25) इति क्त्वायां किन्त्वविकल्पः । कित्व-पक्षे गुणनिषेधः ।
4. 'अस्यतितृषोः क्रियान्तरे कालेषु' (3-4-57) इति णमुल् । 'तृतीयाप्र-भृतीनि—' (2-2-21) इति समासविकल्पः । अद्य गाः पाययित्वा, द्व्यहमति-क्रम्य पाययति, इत्यर्थः ।
5. 'तृषिशुषिरसिभ्यः कित्' [द. उ. 5.44] इति नप्रत्ययो भवति किच्च । तृष्णा=पिपासा ।
6. 'रुधादिभ्यः श्नम्' (3-1-78) इति श्नम् विकरणप्रत्ययः । तस्य मित्त्वात् अन्त्यादचः परो भवति । 'श्नसोरल्लोपः' (6-4-111) इति अल्लोपः । 'नश्चा-पदान्तस्य झलि' (8-3-24) इति मकारस्यानुस्वारः ।
7. 'न गतिहिंसार्थेभ्यः—' (1-3-15) इति कर्मव्यतीहारे शानचो निषेधः ।

[अ] क्षीरस्वामी 'तृहि' इति इदितं धातुं पठति । तदानीं 'इदितो नुम् धातोः' (7-1-58) इति नुमि, तृंहकः-हिका, तृंहकः-हिका, तितृंहिषकः-षिका, तरीतृंहकः-हिका, इत्यादीनि नुम्घटितानि रूपाणि सर्वत्र ज्ञेयानीति विशेषः ।